# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ६** | गुणाः - ७० |
| विषयः – सर्वदर्शनम् | **कोड – C.C.1.1.2** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – १०/१२/२०१६ | सन्दर्भग्रन्थः – साङ्ख्यतत्त्वकौमुदी (१-३१ कारिकापर्यन्ता) | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु द्वयोः कारिकयोः ससन्दर्भं व्याख्यां लिखत।** ०८

(१) मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥

(२) दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि॥

(३) सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतद् तदुपलब्धेः।
महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च॥

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरं लिखत।** ०८

(१) ग्रन्थोक्तदिशा सत्कार्यवादं निरूपयत।

(२) त्रिविधदुःखस्य यथाग्रन्थं निरूपणं लिखत

**प्रश्नः – ३ अधोलिखितेषु द्वयोः उपरि टिप्पणीं लिखत।** ०४

(१) प्रकृतिः।
(२) त्रिविधम् अनुमानम्
(३) "दर्शनम्" इति पदस्य अर्थः।
(४) व्यक्ताव्यक्तज्ञविज्ञानात्।

**प्रश्नः – ४ अधोनिर्दिष्टेषु केषाञ्चित् पञ्चानाम् अतिलघूत्तरं यच्छत।** ०५

(१) साङ्ख्यदर्शनस्य प्रणेता कः ?
(२) साङ्ख्यकारिका केन लिखिता ?
(३) साङ्ख्यतत्त्वकौमुद्याः रचयिता कः ?
(४) किं नाम प्रतिविषयाध्यवसायः ?
(५) साङ्ख्यदर्शने कार्यं सत् अस्ति उत असत् ?
(६) विकारः कतिविधः ?
(७) आनुश्रविकः इति पदस्य कः अर्थः ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु द्वयोः कारिकयोः ससन्दर्भं व्याख्यां लिखत।** ०८

(१) त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥

(२) सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च॥

(३) प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरं लिखत।** ०८

(१) सत्त्वादिगुणत्रयस्य यथाग्रन्थं वर्णनं लिखत

(२) व्यक्ताव्यक्तयोः साधर्म्यवैधर्म्यं निरूपयत।

**प्रश्नः – ७ अधोलिखितेषु द्वयोः उपरि टिप्पणीं लिखत।** ०४

(१) “कारणगुणात्मकत्वात् कार्यस्य”।

(२) “पङ्ग्वन्धवद् उभयोः संयोगः”।

(३) पञ्च भूतानि।

(४) “कारणम् अस्ति अव्यक्तम्”।

**प्रश्नः – ८ अधोनिर्दिष्टेषु केषाञ्चित् पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) प्रीत्यात्मकः गुणः क?

(२) व्यक्तं त्रिगुणम् अस्ति उत त्रिगुणरहितम्?

(३) पुरुषः चेतनः अस्ति उत अचेतनः?

(४) किं नाम कैवल्यम्?

(५) कः साक्षी?

(६) महतः उत्पत्तिः कुतः भवति?

(७) पञ्चभूतानाम् उत्पत्तिःकस्मात् भवति?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु द्वयोः कारिकयोः ससन्दर्भं व्याख्यां लिखत।** ०८

(१) अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्तते सर्गः।
एकादशकश्च गणस्तन्मात्रापञ्चकश्चैव॥

(२) युगपच्चतुष्टयस्य तु वृत्ति क्रमशश्च तस्य निर्दिष्टा।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्ति॥

(३) उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात्।
गुणपरिणामविशेषात् नानात्वं बाह्यभेदाश्च॥

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य उत्तरं लिखत।** ०८

(१) भारतीयदर्शनस्य परिचयं दत्त्वा साङ्ख्यदर्शनस्य वैशिष्ट्यं प्रतिपादयत।

(२) साङ्ख्यदर्शनानुसारं सृष्टिः कथम् उत्पद्यते इति यथाग्रन्थं निरूपयत

**प्रश्नः – ११ अधोलिखितयोः एकां टिप्पणीं लिखत।** ०२

(१) ज्ञानेन्द्रियाणि।

(२) कर्मेन्द्रियाणि।

**प्रश्नः – १२ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखत** ०२

(१) सङ्कल्पकम् इन्द्रियं किम् अस्ति?

(२) के पञ्च वायवः?

(३) किं नाम बुद्धिः?

(४) अहङ्कारात् कतिविधः सर्गः प्रवर्तते?

***

**Answer Key**

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ६** | गुणाः - ७० |
| विषयः – सर्वदर्शनम् | **कोड – C.C.1.1.2** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – १०/१२/२०१६ | सन्दर्भग्रन्थः – साङ्ख्यतत्त्वकौमुदी (१-३१ कारिकापर्यन्ता) | |

## प्रथमान्वितिः (Unit-1)

**प्रश्नः – १**

**प्रश्नः – २**

**प्रश्नः – ३** १.

**प्रश्नः – ४** १. महर्षिः कपिलः
२. ईश्वरकृष्णेन
३. वाचस्पतिमिश्रेण
४. दृष्टप्रमाणम्
५. सत्
६. षोडशविधः
७. वैदिकोपायः ।

## द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ५**

**प्रश्नः – ६**

**प्रश्नः – ७** १.

**प्रश्नः – ८** १. सत्त्वगुणः ।
२. त्रिगुणम् ।
३. चेतनः
४. दुःखस्य आत्यन्तिकी ऐकान्तिकी निवृत्तिः
५. पुरुषः
६. प्रकृतेः
७. पञ्चतन्मात्रातः

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९**

**प्रश्नः – १०**

**प्रश्नः – ११** १.

**प्रश्नः – १२** १. मनः
२. प्राण-अपान-उदान-समान-व्यान इति
३. अध्यवसायः
४. द्विविधः